# सूत्रार्थ संस्पर्शि अध्यासभाष्यम्

**डॉ. जानकीशरणः***

### 1.1 किंचित् प्रास्ताविकम् –

सर्वमेव दर्शनं शास्त्रं वा चतुर्व्यूहमिति प्रसिद्धिरस्ति। यथा वैद्यशास्त्रं रोगः, तन्निदानं, तन्निवृत्त्युपायः, तन्निवृत्तौ स्वस्थता चेति चतुर्व्यूहे स्थितम्। तथैव सर्वमपि दर्शनं चतुर्व्यूहम् । सर्वमपि हितशासके दर्शने अवश्यम् इमे चत्वारः व्यूहाः भवन्ति । तर्हि दुःखम्, तन्निदानम्, तन्निवृत्त्युपायः, तन्निवृत्तौ स्वस्थता इति इमे चत्वारः अंशाः भवन्ति। इयं स्वस्थता दर्शनेषु मोक्षः तत्त्वज्ञानम्, सम्यज्ज्ञानम्, तत्त्वसाक्षात्कारः, परमज्ञानम्, विज्ञानम्, विवेकख्यातिः इत्यादिभिः शब्दैः व्यपदिश्यते। तदर्थमेव सर्वे दार्शनिकाः यतमानाः दृश्यन्ते। तत्र प्रथमः व्यूहः दुःखम् इति। इदं दुःखं न परिचायनीयं कस्यचित्। यतो हि सर्वः कदाचित् सर्वदा वा दुःखम् अनुभवत्येव। यः कदाचित् दुःखम् अनुभवति स लौकिकः इति कथ्यते। यः सर्वदा दुःखम् अनुभवति स विवेकी इति तु आश्चर्यम्। इदं हि दुःखं सर्वेषां प्रतिकूलतया वेदनीयमस्ति। इदं दुःखं आत्मगुणः इति केचित्, अन्तःकरणधर्मः इति केचित् इत्यत्र विप्रतिपत्तिरस्ति। इदं दुःखं आध्यात्मिकम् आधिभौतिकम्, आधिदैविकम् इति त्रिधा विभज्यते कश्चित्। अनन्तानि दुःखानि इति केषांचन मतम्। सर्वथापि दुःखस्य इयत्ता नास्तीति। सर्वं सङ्कलय्य इदं तु अस्माभिः वक्तुं शक्यते यत् दुःखं नाम यत् प्रतिकूलतया वेदनीयं तदेव। कदाचित् प्रतिकूलतया वेदनीयः आत्मगुणः स्यात्, अन्तःकरणधर्मो वा स्यात्। कदाचित् विषयोऽपि प्रतिकूलतयावेदनीयो भवति। सर्वथा तु दुःखतां न व्यभिचरति।

जीवो स्वकृतज्ञाताज्ञातपुण्यापुण्यवशात् नवं नवं शरीरमापद्य प्रत्यहं संसाराह्वं घोरं कान्तारं निरन्तरं संचरति। अस्य जीवस्य सर्वदुःखप्रहाणाय एव सर्वासाम् उपनिषदां प्रवृत्तिः। किन्तु उपनिषदः शाखाभेदेन एकमेव अर्थं नैकशब्देन नैकभेदेन च प्रतिपादयन्ति। अतः उपनिषदर्थः न अल्पधियां बुद्धिपथमारोहति। न्यायोपबृंहितं वाक्यं सुखेन स्वार्थं निश्चाययति। उक्तं हि "न्यायैः प्रसाधितो ह्यर्थ आरोहति मतिं द्रुतम्[1]" इति। अतः न्यायतः उपनिषदर्थं निर्णेतुं भगवान् सूत्रकारः वेदान्तविचारात्मिकां शारीरकमीमांसाम् अरीरचत्। भाष्यकारेण शङ्कराचार्येणापि तथैव अभाणि "वेदान्तवाक्यानाम् कुसुमग्रथनार्थत्वात् सूत्राणाम्। वेदान्तवाक्यानि सूत्रैरुदाहृत्य विचार्यन्ते "इति। तेषां सूत्राणाम् उपरि भाष्यकाराः प्रसनगंभीरं भाष्यं रचयामासुः। तत्रादौ ते सकलानर्थहेतुभूतम् अध्यासं लक्षणसम्भावनाप्रमाणपुरस्सरं निरूपयामासुः।

*दर्शनसङ्कायाध्यक्षः श्रीसोमनाथ संस्कृत विश्वविद्यालय,राजेन्द भुवन रोड, वेरावलम्



अध्यासस्य अयमंशः अस्मिन् दर्शने अत्यन्तं विस्तीर्णः अंशः वर्तते। प्रायः केवलं सूत्रभाष्ययोरेव द्विशतपर्यायेषु अविद्याः अध्यासः इति पदानां प्रयोगः दृश्यते। बृहदारण्यकादौ तु गणयितुमपि न शक्यते। अपि च एतेषु ग्रन्थेषु भिन्नैः भिन्नैः प्रकारैः निरूपितोऽयम् अध्यासः सूत्रार्थसंस्पर्शीति इति यावच्छक्यं सङ्क्षेपेण उपस्थाप्यते।

### 1.2 अध्यासस्य सम्भावना –

अत्र केचन ब्रुवते यत् अध्यासभाष्यग्रन्थः सूत्रार्थं न स्पृशतीति। तथा हि "अथातो ब्रह्मजिज्ञासा[2]" इति आदिमं सूत्रम्। सूत्रवर्णनपरः एव ग्रन्थः भाष्यमिति कथ्यते। यथोक्तं भाष्यलक्षणे –

*सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।*

*स्वपदानि च वर्णयन्ते भाष्यं भाष्यविदो विदुः।। इति।*

किन्तु अध्यासभाष्ये सूत्रार्थवर्णनं न दृश्यते। न च सूत्रे किमपि अध्यासवाचकं पदमस्ति। अतः सूत्रकारेण अनुक्तमपि अध्यासं भाष्यकाराः स्वयं कल्पयन्तीति ।

अस्य आक्षेपस्य समाधानं पंचपादिकाविवरणादिग्रन्थेषु सविस्तरम् अकारि। पंचपादिकाकाराः वदन्ति यत् अध्यासः सूत्रकारेणापि प्रतिपिपादयिषित एव। अतः तन्निरूपणपरस्य ग्रन्थस्य भाष्यत्वं न हीयते, प्रत्युत तस्य शास्त्रारम्भयोगित्वात् भाष्यत्वं सुनिश्चीयते। कथमिति चेत् उदाहरणेन पश्यामः ''अथातो ब्रह्मजिज्ञासा'' इति हि प्रथमं सूत्रम्। अस्मिन् सूत्रे विधायकं पदं न किमपि श्रूयते। अतः प्रेक्षावतां शास्त्रेऽस्मिन् प्रवृत्तिः न स्यात् । यथा लोके "सप्तद्वीपा वसुमती" इति अनुवादकवाक्यानां श्रवणे पुरुषाः न प्रवर्तन्ते, किन्तु "स्वर्गकामो यजेत" इत्यादि यागादिकर्मविधायकवाक्यश्रवणे पुरुषाणां यागादिकर्मणि प्रवृत्तिर्जायते। अतः पुरुषप्रवृत्तिसम्पादनाय किमपि विधायकं पदं सूत्रे योजनीयम्। तत्पदमस्ति "कर्तव्या" इति। अर्थात् ब्रह्मजिज्ञासा कर्तव्या इति सूत्रार्थः करणीयः। अत्र पुनः जिज्ञासा पदस्य अर्थो भवति– ज्ञातुम् इच्छा जिज्ञासा। तदा जिज्ञासापदस्य प्र.तिप्रत्ययार्थयोः ज्ञानेच्छयोः कर्तव्यत्वं न सम्भवति। एवञ्च अन्वयस्य अनुपपत्तेः लक्षणा स्वीकार्या। अत्र ज्ञानेच्छावाचिना जिज्ञासाशब्देन इच्छाज्ञानयोर्मध्ये अवश्यप्राप्तो विचारः उपलक्ष्यते। इच्छा हि स्वविषयसिद्ध्यर्थं यत्नं कृतिं च सम्पादयति। अतः ज्ञानेच्छा स्वविषयस्य ज्ञानस्य प्राप्तये ज्ञानप्राप्त्यनुकूलं विचारम् अवश्यम् आक्षिपति। तथा च ब्रह्मज्ञानाय विचारः कर्तव्यः इति सूत्रार्थः सम्पद्यते।

एवं सति सूत्रकारः किंविषयकं किम्प्रयोजनं च विचारं विधत्त इति जिज्ञासा जायते। न हि निर्विषयप्रयोजनं विचारं सूत्रकारो विधत्ते इति युक्तम्। तथापि सूत्रकारेण अस्मिन् भाष्ये शब्दतो निर्दिष्टे विषयप्रयोजने न दृश्यते। अतस्तेन सूत्ररूपेण शास्त्रं प्रणयता सूत्रकारेण अर्थादेव ते सूचिते इति ज्ञायते। अतः आरभ्यमाणं शास्त्रं सम्भावितविषयप्रयोजनवत् इत्यर्थलाभः।

तत्र विषयस्तावत् "अयमात्मा ब्रह्म[3]" इत्यादि श्रुतेः अद्वितीय ब्रह्मात्मतत्त्वम्। प्रयोजनं तु अशेषानर्थनिवृत्तिः "तरति शोकमात्मवित्[4]" इत्यादि श्रवणात्। इमे विषयप्रयोजने मनसि निधाय सूत्रकारः "अथातो ब्रह्मजिज्ञासा" इति सूत्रं सूत्रयामास। तथा हि मुमुक्षं प्रति ब्रह्मज्ञानाय विचारो विधीयते। तत्र ब्रह्मज्ञानस्य स्वतः फलत्वायोगात् अनर्थनिवर्तकत्वेनैव फलत्वं वक्तव्यम्। अतः ब्रह्मज्ञानस्य फलत्वं निर्दिशता सूत्रकारेण अनर्थनिवृत्याख्यं फलमपि समसूचि। देहाद्यभिमानप्रयुक्तकर्तृत्वपूर्वकं भोक्तृत्वम् एव अनर्थहेतुः। अतः सर्वोऽपि प्रमातृत्वकर्तृत्वभोक्तृत्वादिबन्धः कथंचित् अनर्थमेव जनयति। स च अनर्थः ज्ञानेन निवर्त्यते। निवर्त्यमानो बन्धः पारमार्थिको भवितुं नार्हति, तथा सति तस्य बन्धस्य निवृत्तेरेव असम्भवः। अतो बन्धस्य अध्यस्तत्वमेव वक्तव्यम्।

अत्र पुनः एवमाशङ्का स्यात् – अयमध्यासः सूत्रकारेण कण्ठतः किमर्थं नोक्तः। कण्ठतः अनुक्ते सूचितेऽर्थे सूत्रकारस्य तात्पर्यं विद्यते इति निश्चेतुं न शक्यते इति।

अत्रैवं समाधानम्–अयमध्यासः मुखत एव उक्तः द्वितीयाध्याये उत्क्रान्तिगत्यधिकरणे "तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्[5]" इति। अत्र तच्छब्दः बुद्धिपरः। बुद्ध्यात्मनोः इतरेतराध्यासं पुरस्कृत्य बुद्धिगतानाम् अणुत्वोत्क्रान्त्यादिधर्माणाम् आत्मनि व्यपदेशः, कर्तृत्वादिबन्धस्य बुद्ध्युपाधि.तत्वात्, यथा विभोरपि ब्रह्मणः उपासनेषु औपाधिकाणुत्वव्यपदेशः, तद्वत् इति सूत्रार्थः। अन्यत्रापि "यथा च तक्षोभयथा[6]" इत्यत्र कर्तृत्वादेः अध्यस्तत्वं स्फुटीचकार सूत्रकारः।

अत्र पुनः शङ्का – तर्हि शास्त्रारम्भोपयोगिनम् अध्यासं सूत्रकार आदावेव कुतो नोक्तवान्।

अत्र समाधानम् – वादकथा हि द्विविधा – (1) प्रतिपादनम्, (2) उपोद्घात इति। यथोक्तं विवरणकारैः "प्रतिपाद्यमर्थं बुद्धौ सङ्गृह्य प्रागेव तदर्थम् अर्थान्तरवर्णनम् उपोद्घातः। प्रतिपाद्यं बहिरेव प्रतिज्ञाय पश्चात् तत्सिद्धिहेतूपवर्णनं प्रतिपादनम्" इति। तत्र सूत्रकारस्तु प्रतिपादनप्रक्रियाम् अनुसरति। तथा हि आदौ ब्रह्मजिज्ञासां प्रतिज्ञाय, प्रतिज्ञातस्य ब्रह्मणो लक्षणं किम् इति लक्षणाशङ्कायां "जन्माद्यस्य यतः[7] "इति सूत्रयित्वा, तस्मिन् ब्रह्मणि प्रमाशङ्कायां "शास्त्रयोनित्वात्[8]" इत्याह। तच्च शास्त्रयोनित्वं आक्षेपसमाधानपूर्वकं दृढयता सूत्रकारेण "तत्तु समन्वयात्" इत्यादिभिः सूत्रैः सर्वेषां वेदान्तां ब्रह्मणि समन्वयः प्रादर्शि। भाष्यकारास्तु उपोद्घातप्रक्रियायां प्रावर्तन्त।किमर्थमिति चेत् श्रोतृणां सुखप्रतिपत्त्यर्थं ते, सूत्रकारेण अग्रे प्रदर्शयिष्यमाणमपि विषयं शास्त्रारम्भोपयोगितया आदौ स्मारयितुम् ऐच्छन्। अतस्ते आक्षेपसमाधानाभ्याम् आदावेव बन्धस्य अध्यस्तत्वं प्रतिपादयामासुः।

अतः सम्भावितविषयप्रयोजनयोः अभावे शास्त्रस्य आरम्भणीयता एव न सिद्ध्यति। विषयप्रयोजने च कर्तृत्वादिबन्धस्य अध्यासात्मकत्वप्रदर्शनं विना उपपादयितुं न शक्येते। अतः शास्त्रम् आरभमाणेन सूत्रकारेण सूचितयोः विषयप्रयोजनयोः



सिद्धये भाष्यकाराः अध्यासं निरूपयामासुः। तस्मात् अध्यासभाष्यं नितरां सूत्रार्थं संस्पृशतीत्यत्र न काऽपि संशीतिः।

**1.3 अध्यासलक्षणम् –**

अध्युपसर्गाद् आस्–धातोरचि प्रत्यये सति अध्यास इति पदसिद्धिः। अर्थात् अधिकृत्य आस्ते, आधारमाश्रित्य तिष्ठतीत्यर्थः। अध्यासो नाम रज्जौ सर्पः, शुक्तौ रजतं चेतिवद् अयथार्थज्ञानं, भ्रमात्मकं ज्ञानं वा। "स्मृतिरूपः परत्र पूर्वदृष्टावभासः[9]" इति अध्याससामान्यलक्षणमाह भाष्यकारः। अध्यासो खलु स्मृतिस्वरूपः। स्मृतिस्तावत् संस्कारजन्या भवति तथैव अध्यासोऽपि। स्मृतौ वस्तु सम्मुखं न भवति, किन्तु भ्रमेऽथवाध्यासे विषयवस्तु सम्मुखे तिष्ठति। अतो भ्रमज्ञानं प्रत्यक्षं ज्ञानमिति उच्यते। शुक्तिरजतादिभ्रमज्ञाने निरधिष्ठानकज्ञानं न भवति, यतो हि कुत्रचिदधिष्ठाने एव भ्रमः उत्पद्यते। शुक्त्यधिष्ठाने सति रजतभ्रमो जायते। प्रद्रुतेऽपि प्रपंचभ्रमाधिष्ठानमस्ति ब्रह्म। अनाद्यध्यासवशादेवैकं ब्रह्म जीवरूपेण जगद्रूपेण च विवर्तते।[10] अर्थात् अनादिशुद्धे नित्ये ब्रह्मणि अनाद्यविद्याकारणेनैव विषयिनिष्ठो विभ्रम उत्पद्यते।

अस्मिन् लक्षणवाक्ये स्मृतिपदं पूर्वदृष्टपदं च परिचायकमेव न लक्षणघटकम्। लक्षणन्तु "परत्र अवभासः" इति। परस्य अवभासः इति अर्थात् लभ्यते। परत्र इत्युक्ते पुरतः विद्यमाने अधिष्ठाने अवभासः अर्थात् अन्यस्य प्रतीतिः इति।यथा परत्र विद्यमानायां शुक्तिकायां परस्य रजतस्य अवभासः ज्ञानं भवतीति शुक्तिरजतभ्रमे लक्षणसमन्वयः। शुक्तिरजतस्थले भ्रमे भासमानं रजतं सन्निहितं नास्ति, अतः तस्य असन्निहितत्वं स्मृतिरूपपदेन सूच्यते । स्मृतेः रूपमिव रूपं यस्य तत् स्मृतिरूपम्। स्मृतेः खलु इदं रूपमस्ति यत् असन्निहितविषयत्वं दूरस्थं पुत्रादिकं जनः स्मरति। अध्यसनीयस्य अथवा आरोप्यस्य भ्रमात्पूर्वं ज्ञानमावश्यकमिति द्योतयितुं लक्षणे पूर्वदृष्टशब्दः प्रयुक्तः। यस्य खलु रजतज्ञानमेव नास्ति, अथवा यो रजतं न जानाति तस्य शुक्तिदर्शने रजताध्यासः कथं भवेत् ? एवं च अध्यासे संस्कारः आवश्यकः। संस्कारात् कालान्तरे स्मृतिः उपपद्यते। अतः संस्कारजन्यं अन्यत्र अन्यस्य ज्ञानं अध्यासः इति अध्यासलक्षणम्।

असावेव "अतस्मिन् तद्बुद्धिः[11]" इत्यपि निगद्यते। यत्र यन्नास्ति, तत्र तद्बुद्धिरेव अतस्मिंस्तद्बुतद्धिरिति उच्यते। "अवभासः" इति अध्यासस्य सङ्क्षिप्तं लक्षणम्, "स्मृतिरूपः परत्र पूर्व.ष्टावभासः" इति विस्तृतं लक्षणमिति भामतीकाराणामाशयः। "अवसन्नोऽवमतो वा भासोऽवभासः[12]"। "अवभासः" इति सङ्क्षिप्तलक्षणे अवभासपदस्य अवयवार्थः परिगृह्यते। तथा हि अवपूर्वस्य "भासृ–दीप्तौ[13]" धातोः घञ्प्रत्ययेन निष्पन्नोऽयमवभासशब्दः। तत्र भासधातुः प्रकाशार्थकः, अव–इत्युपसर्गश्च द्योतकः। प्रकाशो नाम ज्ञानम्। अतः भासधातोः भावे घञ्–प्रत्यये कृते ज्ञानं प्रकाशो वा भासः। कर्मणि घञ्–प्रत्यये कृते ज्ञेयं प्रकाश्यं वा भास

इत्यर्थलाभः। अवसन्तः भासः अवभासः। अवसादः उच्छेदः, अवमानो यौक्तिकतिरस्कारः। अवसादो बाधकज्ञानोदयानन्तरं भ्रमनिवृत्त्यन्तरोत्पत्तिबन्धरूपः, भ्रमज्ञानोच्छेदरूपः। अनेन सङ्क्षिप्तलक्षणेन अध्यासो मिथ्याज्ञानमिति प्रतिपादितम्। ज्ञानस्य मिथ्यात्वे तज्ज्ञानस्य ज्ञेयमपि मिथ्या इति स्वत एव सिद्ध्यति। रज्जौ सर्पज्ञानं यथा मिथ्या, तथा तज्ज्ञानस्य ज्ञेयरूपः सर्पोऽपि मिथ्या। वेदान्तशास्त्रे अन्यथाख्यातेः अनङ्गीकारात् परत्र अवभासः संस्कारवशादेव भवति इत्यध्यासस्य उपपादनाय भाष्ये स्मृतिरूपपूर्वदृष्टपदे निवेशिते। तथा च यस्मिन् काले यत्र यन्नास्ति, तस्मिन्नेव काले तत्र तदस्तीति प्रतीतिः आरोपः, तद्विषयिणी प्रतीतिरध्यासः।

अयं चाध्यासो द्विविधः– अर्थाध्यासो ज्ञानाध्यासश्चेति। तत्र अर्थाध्यासो नाम दोषसम्प्रयोगसंस्कारवशादतस्मिन् तस्योदयः, यथा शुक्त्यादौ रजतादिः। ज्ञानाध्यासो नाम दोषादिवशादतस्मिन् उदिते तद्बुद्धिः, यथा रज्ज्वादौ उदिते सर्पादौ सर्पादिबुद्धिः। अतः पूर्वोक्तभाष्यवाक्ये अवभासशब्दः "अवभास्यते इत्यवभासः" इति व्युत्पत्त्या अर्थाध्यासपरः, "अवभासनमवभासः" इति व्युत्पत्त्या च ज्ञानाध्यासपरः।

ननु आत्मा "अहम्" इति ज्ञाने भासते, अनात्मा तु "इदम्" इति ज्ञाने भासते। अहंशब्दवाच्यः इदंशब्दवाच्यो न भवति। न हि कदाचिद् घटपटशब्दौ समानार्थकौ भवतः। अपि च शरीरादिः अनात्मा ज्ञानविषयत्वेन भासते, आत्मा तु ज्ञानरूपत्वात् विषयित्वेन भासते। तथा च तयोः भेदः स्फुटः। आत्मा चेतनः अनात्मप्रपंचस्तु अचेतनः। तर्हि जडचेतनयोः अध्यासः कथं सम्भवति? न हि अन्धकारप्रकाशयोः परस्परम् अध्यासो भ्रमरूपः केनापि प्रत्यक्षीक्रियते।

उच्यते – यथा अप्रत्यक्षेऽपि आकाशे बाला अविवेकिनः "नभ इन्द्रनीलकटाहकल्पम्", "पीतं नभः" इत्यादिव्यवहरन्ति। तथैव अद्वितीये सजातीयविजातीयस्वगतभेदशून्ये ब्रह्मणि विश्वकल्पना भवति। भाष्यकारेण "शुक्तिका हि रजतवदवभासते, एकश्चन्द्रः सद्वितीयवदिति[14]" इत्यनेन अप्रत्यक्षेऽपि विषये अध्यासो भवतीति समसूचि।

**1.4 अध्यासनिमित्तम्** – अध्यासस्य किं नाम निमित्तमिति जिज्ञासायां भाष्यकाराः "अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्य इतरेतराविवेकेनात्यन्तविविक्तयोः धर्मधर्मिणोः मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य "अहमिदम्", "ममेदमिति" नैसर्गिकोऽयं लोकव्यवहारः[15] "इत्याहुः। इतरेतराविवेकश्च परस्परं विवेकाग्रहो भेदाग्रहो वा अध्यासनिमित्तमित्यर्थः।

भ्रमस्थले प्राचीनाचार्या अधिष्ठानसामान्यज्ञानविशेषाज्ञानं कारणमिच्छन्ति। अधिष्ठानस्य विशेषज्ञानं तु अध्यासनिवर्तकं वर्तते। तथापि अधिष्ठानस्य सामान्यज्ञानमध्यासप्रयोजकमिति वेदान्तिभिः स्वीक्रियते। यथा शुक्तिरजतस्थले "इदं



रजतम्" इत्यत्र इदमिति सामान्यज्ञानमस्ति। पुरतः विद्यमानायां शुक्तौ प्रतीयमानं रजतं न देशान्तरे विद्यमानं वर्तते नापि असत्, किन्तु शुक्तावेव प्रतीतिकाले समुत्पद्यते, अत एव तद्रजतं वेदान्तिभिः प्रातिभासिकं रजतमित्यभिधीयते।

शुक्तौ प्रातिभासिकरजतोत्पत्तिस्तु इत्थम् – पुरोवर्तितशुक्त्या सह चक्षुस्संयोगेन काचित् अन्तःकरणवृत्तिर्जायते। सा च चक्षुर्गतकाचादिदोषेण, प्रमातृगतदोषेण, शुक्तिगतचाकचिक्यादिदोषेण च केवलम् इदमाकारा भवति, न तु शुक्त्याकारा। एवम् अन्तःकरणस्य वृत्तिद्वारा विषयदेशे समवधानेन प्रमातृप्रमाणप्रमेयचैतन्यानाम् ऐक्यप्राप्तौ इदमिति अधिष्ठानसामान्यज्ञानं भवति। तदा इदमंशगतचाकचिक्यादिरजतसादृश्यज्ञानेन पूर्वदृष्टरजतस्य संस्कार उद्बुध्यते। संस्कारोऽयं प्रमातृचैतन्याभिन्नेदमंशावच्छिन्नचैतन्ये विद्यमानायाः शुक्तितत्त्वविषयिण्याः त्रिगुणात्मिकाया अविद्यायाः क्षोभं जनयति। तदा सा तमोगुणप्रधानाऽविद्या काचादिदोषसहकृता अभिनवरजताकारेण परिणमते। तस्मिन्नेव काले इदमंशावच्छिन्नचैतन्याभिन्नसाक्षिचैतन्यनिष्ठा सत्त्वगुणप्रधाना अविद्या रजताकारेण परिणमते। अविद्यायाः चैतन्याश्रितत्वात् अविद्यापरिणामरूपस्य रजतस्यापि चैतन्यमेव अधिष्ठानम्। तथापि इदमंशस्य अधिष्ठानतावच्छेदकत्वात्, तेन सह रजतस्य तादात्म्यम् अनुभूयते। तदा इदमंशावच्छिन्नचैतन्यस्य रजतं प्रति अधिष्ठानत्वात् "इदं रजतम्" इति प्रतीतिरुत्पद्यत इति।

सङ्क्षेपशारीरककारा अध्यासस्य कारणं तु मिथ्याज्ञानाद्यपर्याया अविद्येति मेनिरे। तेषां हि "अध्यस्ततां प्रति समर्थमबोधमात्रम्[16] " इति मतम्। तत्र अध्यासकारणीभूते संस्कारे प्रमाजन्यत्वं नापेक्षितम्, किन्तु प्रतीतिजन्यत्वमात्रमपेक्षते। अर्थात् अध्यस्यमानस्य विषयस्य वस्तुतः क्वचित् सत्त्वं भवेत्, तस्य प्रमा च पूर्वं भवेदिति नियमो नास्ति। किन्तु भ्रमप्रमासाधारणी प्रतीतिः केवलं पूर्वमावश्यकम्। अत एव भाष्यकारेणोक्तम् "सत्यानृते मिथुनीकृत्य[17]" इति। सत्यं चिदात्मा, अनृतं बुद्धीन्द्रियदेहादि, ते द्वे धर्मिणी युगलीकृत्य विवेकाग्रहाद् अध्यस्य लोकव्यवहारो जायत इत्यर्थः। अत्र सत्यस्य अनृतस्य च मिथुनं यद्यप्युक्तं तथापि सत्यानृतयोः पारमार्थिकं मिथुनं न सम्भवतीति ज्ञापनार्थं भाष्यकारा अभूततद्भावार्थस्य च्वेः प्रयोगमकार्षुः। प्रकृतेऽपि प्राचीनाध्यासजन्यसंस्कारः पाश्चात्त्याध्यासं प्रति हेतुः। भामतीकाराः "पूर्वपूर्वमिथ्याज्ञानोपदर्शितस्य बुद्धीन्द्रियशरीरादेः उत्तरोत्तराध्यासोपयोगः[18] "इत्यनेन पूर्वपूर्वाध्यासः पाश्चात्त्याध्यासस्य हेतुरिति जगदुः।

नन्वेवं सति संस्कारात् अध्यासो जायते, अध्यासाच्च संस्कार इति अन्योन्याश्रयदोषः दुर्वारमिति चेत्। उच्यते – अयमध्यासः न सादिः, किन्त्वनादिः। तदुक्तं भाष्यकारेण "नैसर्गिकोऽयं लोकव्यवहारः[19]" इति। नैसर्गिकः स्वाभाविकः अनादिरयं लोकव्यवहारः इत्यर्थः। अध्यासकार्यभूतस्य व्यवहारस्य नैसर्गिकत्वेन अनादित्वेन वा तत्कारणभूतस्य मिथ्याज्ञानभूतस्य अध्यासस्यापि अनादित्वमभ्युपेयम्। ततश्च यथा

बीजादङ्कुरो जायते, अङ्कुराच्च बीजमिति तयोः परस्परसापेक्षत्वेऽपि तत्सापेक्षत्वस्य अनादित्वाद्यथा तत्र परस्पराश्रयो दोषो न स्वीक्रियते, एवमत्रापि पूर्वमिथ्याज्ञानजन्यः पूर्वारोपजन्यो वा संस्कारः उत्तरकालीनस्य आरोप्यस्य जनकः संस्कारः, तदारोपजन्यसंस्कारश्च तदुत्तरकालीनस्य आरोपान्तरस्य जनक इति न परस्पराश्रयदोषः। तथा चानादिपरम्पराक्रमेण आगतः आत्मानात्मनोः इतरेतराविवेक एव अध्यासे निमित्तभूत इत्याशयः।

अत्र पुनरपि शङ्का—शुक्तिरजतयोरिव विविक्तयोः हि वस्तुसतोर्भेदाग्रहनिबन्धनः तादात्म्यविभ्रमो युज्यते। अद्वैतवादिनां मते तु आत्मानात्मनोः भेदाग्रह इति वक्तुं न युज्यते। तेषां मते एकमेव सद्वस्तु, स चात्मा। आत्मव्यतिरिक्तमनात्मभूतं न किमपि सद्वस्तु अस्ति, न हि परमार्थसतः चिदात्मनः अत्यन्तभिन्नत्वेन देहादि सद्वस्तु अस्ति। तत् कथं केन वा चिदात्मनः भेदाग्रहः तादात्म्यविभ्रमो वा भवेत्, निरस्तसमस्तभेदेऽद्वितीये एकस्मिन् ब्रह्मवस्तु तदसम्भवात् इति।

पूर्वोक्तमेव समाधानमत्रोच्यते — एकस्मिन् अपरस्य आरोपभूते अध्यासे आरोपाधिष्ठानम् आरोप्यं च इत्येतद्द्वितयस्यापि वास्तविकं सत्त्वम् आवश्यकमिति नास्ति नियमः। अध्यासे दृष्टत्वमात्रम् उपयुज्यते, न वस्तुसत्ता इति। अप्रतीतस्य आरोपायोगात् आरोपार्थम् आरोप्यस्य प्रतीतिरेव उपयुज्यते न वास्तविकसत्यत्वम्। अत एव भाष्यकारेण "सत्यानृते मिथुनीकृत्य "इत्यनेन सत्यं चिदात्मा, अनृतं बुद्धीन्द्रियदेहादि, ते द्वे धर्मिणी युगलीकृत्य विवेकाग्रहादध्यस्य लोकव्यवहारो भवतीति सम्भावनाभाष्ये सूचितम्।

त्रिगुणात्मिकया मायया जगदिदं सृष्टेः पूर्वम् "असदेवेदमग्र आसीत्[20]", "असद्वा इदमग्र आसीत्[21]" इत्यादिश्रुत्युक्तदिशा अव्यक्तमासीत्। तत्राव्यक्तनामरूपे अनादिभूताः सर्वे जीवाः स्वस्वकर्मार्जितपूर्वपूर्वसंस्कारविशेषैः सह जतुपिण्डे स्वर्णरेणव इव प्रलीना एकीभूता वर्तन्ते। तदेव अव्याकृतं सर्वाधिष्ठातृपरमेशेक्षणाद् गुणसाम्यावस्थां सन्त्यजद् व्यक्तसंज्ञां च गच्छद् उत्पन्नमिति वदता ग्रन्थकारेण अभावकारणवादस्य खण्डनं कृत्वा सत्कारणवादः प्रतिष्ठापितः। अस्य जगतः कारणं सद्, उत्पत्तेः प्राक् जगदिदं सद्रूपेणासीत्। सतः कारणात्तदभिन्नत्वेन कार्यमुत्पद्यते। उत्पत्तेः प्राक् च कार्यं कारणरूपेण अवतिष्ठत इति सत्कारणवादिनो वेदान्तिनो बाभाषन्ते।

**1.5 अध्यासे प्रमाणम्** —आत्मानात्मनोरध्यासः सर्वेषां लौकिकानां वैदिकानां च व्यवहाराणां मूलकारणम् इति अध्यासभाष्ये स्पष्टं प्रोक्तम्। देहेन्द्रियसङ्घातस्य जडत्वं सर्वैः स्वीक्रियते । ता.शानां जडानां स्वतः प्रवृत्तिः सम्भावयितुं न शक्यते। शुद्धस्य ज्ञानरूपस्य आत्मनोऽपि स्वतः प्रवृत्तिः नास्ति। अतः यदा नरः कंचिद्विषयं ज्ञातुं इच्छति तदा सः प्रमाता इन्द्रियरूपेण प्रमाणेषु स्वतादात्म्यं अध्यस्य प्रवृत्तिं सम्पादयति, इन्द्रियद्वारा घटादीनां ज्ञाता भवति। एता.शः व्यापारविशेषः आत्मानात्मनोः



पृथक्सत्तायां ज्ञायमानायां नोपपद्यते इति हेतोः तयोः परस्पराध्यासः सर्वेषां व्यवहाराणां मूले नितान्तम् आवश्यको भवति । अपि च लोके प्रत्यक्षम् अध्यासो अनुभूयते। अतः भाष्यकारेण शरीरकमीमांसायाः आरम्भे सम्भावनालक्षणप्रमाणपुरस्सरं वर्णितमध्यासभाष्यं सर्वथा सूत्रार्थसंस्पर्शीति शम्।

1. ब्रह्मसूत्रशाङ्करभाष्यम् पृ. .17
2. ब्रह्मसूत्रम्, 1.1.1
3. बृहदारण्यकोपनिषद्, 2.5.19
4. छान्दोग्योपनिषद्, 7.1.3
5. ब्रह्मसूत्रम्, 2.3.29
6. ब्रह्मसूत्रम्, 2.3.40
7. ब्रह्मसूत्रम्, 1.1.2
8. ब्रह्मसूत्रम्, 1.1.3
9. ब्रह्मसूत्रशाङ्करभाष्यम् पृ. 17
10. पंचपादिका पृ. 14—15
11. ब्रह्मसूत्रशाङ्करभाष्यम् पृ. 44
12. ब्रह्मसूत्रशाङ्करभाष्य—भामतीव्याख्यानम् पृ. 18
13. धातुपाठः, 624
14. ब्रह्मसूत्रशाङ्करभाष्यम् पृ. 33
15. ब्रह्मसूत्रशाङ्करभाष्यम् अध्यासभाष्यम्, पृ. 16
16. सङ्क्षेपशरीरकम्, 1.27
17. ब्रह्मसूत्रशाङ्करभाष्यम् अध्यासभाष्यम्, पृ. 16
18. ब्रह्मसूत्रशाङ्करभाष्य—भामतीव्याख्यानम्, पृ. 10
19. ब्रह्मसूत्रशाङ्करभाष्यम् अध्यासभाष्यम्, पृ. 16
20. छान्दोग्योपनिषत्, 3.19.1
21. तैत्तिरीयोपनिषत्, 2.7.1